# विषयः-काव्यालंकारसूत्रवृत्ति काव्याङ्गानि
# 6th SehoHons
# DSE-3

Powerpoint presentation by
Madhumita Pal
Department Of Sanskrit
SACT-II

अधिकारिचिन्तां रीतितत्त्वं निरूप्य काव्याङ्गानि प्रसङ्गेनाह -
"लोको विद्या प्रकीर्णं च काव्याङ्गानि"।
लोकः
विद्या
प्रकीर्णम्

"लोकवृत्तं लोकः"
"लोकः स्थावरजङ्गमात्मा।तस्य वर्तनं वृत्तमिति"
लोकशब्दोऽयमुपचाराल्लोकवर्तने वर्तते इत्याह।

"शव्दस्मृत्यभिधानकोशच्छन्दोविचितिकलाकामशास्त्रदण्डनीतिपूर्वा विद्याः"।

"शव्दस्मृत्यादीनां तत्पूर्वकत्वं पूर्वं काव्यवन्धेषु अपेक्षणीयत्वात्"

१| "शव्दस्मृतेः शव्दशुद्धिः"

"शव्दस्मृतेर्व्याकरणात् शव्दानां शुद्धिः साधुत्वनिश्चयः कर्तव्यः"।

व्याकरण सर्वविद्यायाः मूलम् तेन हि सर्वप्रथमम् शव्दविद्यायाः उपयोग प्रदर्शिति- शव्दस्मृतिरिति।

२|"अभिधानकोशात् पदार्थनिश्चयः"
पदं हि रचनाप्रवेशयोग्यं भावयन्
सन्दिग्धार्थेन न गृह्णीयान्न।तस्माद्
अभिधानकोषतःपदार्थनिश्चयः कर्तव्य इति।

३|"छन्दोविचितेर्वृत्तसंशयच्छेदः"
काव्याभ्यासाद् वृत्तसंक्रान्तिर्भवत्येव।किंतु
मात्रावृत्तादिषु क्वचित् संशयः स्यात्।अतो
वृत्तसंशयच्छेदच्छन्दोविचितेर्विधेय इति।

४| "कलाशास्त्रेभ्यः कलातत्त्वस्य संवित्"।

कलागीतनृत्यचित्रादिकास्तासामभिधाय
कानि शास्त्राणि विशाखिलादि
प्रणीतानि कलाशास्त्राणि,तेभ्यः
कलातत्त्वस्य संवित् संवेदनम्।

५| "कामशास्त्रतः कामोपचारस्य"।
सविदितित्यनुवर्तते।कामोपचारस्य संवित्
कामशास्त्रत इति।कामोपचारवहुलं हि वस्तु
काव्यस्येति।

६| "दण्डनीतेर्नयापनययोः"।
दण्डनीतेरर्थशास्त्रात् नयस्य अपनयस्य
च संविदिति।तत्र षाड्गुण्यस्य यथावत्
प्रयोगो नयः।तद्विपरीतोऽपनयः।

७| "इतिवृत्तकुटिलत्वं च ततः"।
इतिहासादिरितिवृत्तं काव्यशरीरं।तस्य
कुटिलत्वं ततो दण्डनीतेर्वलीयत्वादिप्रयोगः
व्युत्पत्तिमूलत्वात् तस्याः।

प्रकीर्णम्--
"लक्ष्यज्ञत्वमभियोगो वृद्धसेवाऽवेक्षणं
प्रतिभानमवधानं च प्रकीर्णम्।"
लक्ष्यज्ञत्वः, अभियोगः, वृद्धसेवा, अवेक्षण,
प्रतिभा, अवधानश्च षड् प्रकीर्णानि।

१|"तत्र काव्यपरिचयो लक्ष्यज्ञत्वम्"
अन्येषां काव्येषु परिचयो लक्ष्यज्ञत्वम्।ततो
हि काव्यवन्धस्य व्युत्पत्तिर्भवति।

२|"काव्यवन्धोद्यमोऽभियोगः"
वन्धनं वन्धः।काव्यस्य वन्धो रचना
काव्यवन्धः।तत्रोद्यमोऽभियोगः।स ह
कवित्वप्रकर्षमादधाति।

३|"काव्योपदेशगुरुशुश्रूसणं वृद्धसेवा"।
काव्योपदेशे गुरवः उपदेष्टारः।तेषां शुश्रूषणं
वृद्धसेवा।ततः काव्यविद्यायाः
संक्रान्तिर्भवति।

४|"पदाधानोद्धरणमवेक्षणम्"।
पदस्य् आधानं
न्य्ासः।उद्धरणमपसारणम्। तयोः
खल्वव्वेक्षणम्।

५|"कवित्ववीजं प्रतिभानम्"।
कवित्वस्य वीजम्, कवित्ववीजम्,
जन्मान्तरागतसंस्कारविशेषः कश्चिद्, यस्माद्विना
काव्यं न निष्पद्यते।निष्पन्नं वा हास्यायतनं स्यात्।

६| "चित्तैकाग्र्यमवधानम्"।
चित्तस्यैकाग्रं
वाह्यार्थनिवृत्तिस्तदवधानम्।अवहितं हि
चित्तमर्थान् पश्यति।

धन्यवादन्तो